श्री गुह्यकाळी सुधाधारा स्तवः

श्री गुह्यकाळी सुधाधारा स्तवः

महाकाल रुद्र उवाच |
अचिंत्यामिताकारशक्तिस्वरूपा
प्रतिव्यक्त्यधिष्ठानसत्त्वैकमूर्तिः |
गुणातीतनिर्द्वंद्वबोधैकगम्या
त्वमेका परब्रह्मरूपेण सिद्धा || 1 ||

अगोत्राकृतित्वादनैकांतिकत्वा-
-दलक्ष्यागमत्वादशेषाकरत्वात् |
प्रपंचालसत्वादनारंभकत्वात्
त्वमेका परब्रह्मरूपेण सिद्धा || 2 ||

असाधारणत्वादसंबंधकत्वा-
-दभिन्नाश्रयत्वादनाकारकत्वात् |
अविद्यात्मकत्वादनाद्यंतकत्वात्
त्वमेका परब्रह्मरूपेण सिद्धा || 3 ||

यदा नैव धाता न विष्णुर्न रुद्रो
न कालो न वा पंचभूतानि नाशा |
तदा कारणीभूत सत्त्वैकमूर्ति-
-स्त्वमेका परब्रह्मरूपेण सिद्धा || 4 ||

न मीमांसका नैव कालादितर्का
न सांख्या न योगा न वेदांतवेदाः |
न देवा विदुस्ते निराकारभावं
त्वमेका परब्रह्मरूपेण सिद्धा || 5 ||

न ते नामगोत्रे न ते जन्ममृत्यू
न ते धामचेष्टे न ते दुःखसौख्ये |
न ते मित्रशत्रू न ते बंधमोक्षौ
त्वमेका परब्रह्मरूपेण सिद्धा || 6 ||

न बाला न च त्वं वयस्का न वृद्धा
न च स्त्री न षंढः पुमान्नैव च त्वं |
न च त्वं सुरो नासुरो नो नरो वा
त्वमेका परब्रह्मरूपेण सिद्धा || 7 ||

जले शीतलत्वं शुचौ दाहकत्वं
विधौ निर्मलत्वं रवौ तापकत्वं |
तवैवांबिके यस्य कस्यापि शक्ति-
-स्त्वमेका परब्रह्मरूपेण सिद्धा || 8 ||

पपौ क्ष्वेडमुग्रं पुरा यन्महेशः
पुनः संहरत्यंतकाले जगच्च |
तवैव प्रसादान्न च स्वस्य शक्त्या
त्वमेका परब्रह्मरूपेण सिद्धा || 9 ||

कराळाकृतीन्याननानि श्रयंती
भजंती करास्त्रादि बाहुल्यमित्थं |
जगत्पालनायाऽसुराणां वधाय
त्वमेका परब्रह्मरूपेण सिद्धा || 10 ||

रुवंती शिवाभिर्वहंती कपालं
जयंती सुरारीन् वधंती प्रसन्ना |
नटंती पतंती चलंती हसंती
त्वमेका परब्रह्मरूपेण सिद्धा || 11 ||

अपादाऽपि वाताधिकं धावसि त्वं
श्रुतिभ्यां विहीनाऽपि शब्दं शृणोषि |
अनासाऽपि जिघ्रस्य नेत्राऽपि पश्य-
-स्वजिह्वाऽपि नानारसास्वाद विज्ञा || 12 ||

यथा बिंबमेकं रवेरंबरस्थं
प्रतिच्छायया यावदेकोदकेषु |
समुद्भासतेऽनेकरूपं यथावत्
त्वमेका परब्रह्मरूपेण सिद्धा || 13 ||

यथा भ्रामयित्वा मृदं चक्रमध्ये
कुलालो विधत्ते शरावं घटं च |
महामोहयंत्रेषु भूतान्यशेषान्
तथा मानुषांस्त्वं सृजस्यादिसर्गे || 14 ||

यथा रंगरज्ज्वर्कदृष्टिष्वकस्मा-
-नृणां रूपदर्वीकरांबुभ्रमः स्यात् |
जगत्यत्र तत्तन्मये तद्वदेव
त्वमेकैव तत्तन्निवृतौ समस्तं || 15 ||

महाज्योति एकार सिंहासनं यत्-
स्वकीयान् सुरान् वाहयस्युग्रमूर्ते |
अवष्टभ्य पद्भ्यां शिवं भैरवं च
स्थिता तेन मध्ये भवत्येव मुख्या | 16 ||

क्व योगासने योगमुद्रादिनीतिः
क्व गोमायुपोतस्य बालाननं च |
जगन्मातरादृक् तवाऽपूर्वलीला
कथं कारमस्मद्विधैर्देवि गम्या || 17 ||

विशुद्धा परा चिन्मयी स्वप्रकाशा-
-मृतानंदरूपा जगद्व्यापिका च |
तवेदृग्विधाया निजाकारमूर्तिः
किमस्माभिरंतर्हृदि ध्यायितव्या || 18 ||

महाघोरकालानल ज्वालज्वाला
हिता त्यक्तवासा महाट्टाट्टहासा |
जटाभारकाला महामुंडमाला
विशाला त्वमीदृङ्मया ध्यायसेऽंब || 19 ||

तपो नैव कुर्वन् वपुः खेदयामि
व्रजन्नापि तीर्थं पदे खंजयामि |
पठन्नापि वेदं जनिं पावयामि
त्वदंघ्रिद्वये मंगळं साधयामि || 20 ||

तिरस्कुर्वतोऽन्यामरोपासनार्चे
परित्यक्तधर्माध्वरस्यास्य जंतोः |
त्वदाराधनान्यस्त चित्तस्य किं मे
करिष्यंत्यमी धर्मराजस्य दूताः || 21 ||

न मन्ये हरिं नो विधातारमीशं
न वह्निं न ह्यर्कं न चेंद्रादि देवान् |
शिवोदीरितानेक वाक्यप्रबंधै-
-स्त्वदर्चाविधानं विशत्वंब मत्यां || 22 ||

न वा मां विनिंदंतु नाम त्यजेन्मां
त्यजेद्बांधवा ज्ञातयः संत्यजंतु |
यमीया भटा नारके पातयंतु
त्वमेका गतिर्मे त्वमेका गतिर्मे || 23 ||

महाकालरुद्रोदितस्तोत्रमेतत्
सदा भक्तिभावेन योऽध्येति भक्तः |
न चापन्न शोको न रोगो न मृत्यु-
-र्भवेत् सिद्धिरंते च कैवल्यलाभः || 24 ||

इदं शिवायाः कथितं सुधाधाराख्यं स्तवं |
एतस्य सतताभ्यासात् सिद्धिः करतलेस्थिता || 25 ||

एतत् स्तोत्रं च कवचं पद्यं त्रितयमप्यदः |
पठनीयं प्रयत्नेन नैमित्तिकसमर्पणे || 26 ||

सौम्येंदीवरनीलनीरदघटाप्रोद्दामदेहच्छटा
लास्योन्मादनिनादमंगळचयैः श्रोण्यंतदोलज्जटाः |
सा काळी करवालकालकलना हंत्वश्रियं चंडिका || 27 ||

काळी क्रोधकराळकालभयदोन्मादप्रमोदालया
नेत्रोपांतकृतांतदैत्यनिवहाप्रोद्दाम देहाभया |
पायाद्वो जयकाळिका प्रवळिका हूंकारघोराननना
भक्तानामभयप्रदा विजयदा विश्वेशसिद्धासना || 28 ||

कराळोन्मुखी काळिका भीमकांता
कटिव्याघ्रचर्मावृता दानवांता |
हूं हूं कड्मडीनादिनी काळिका तु
प्रसन्ना सदा नः प्रसन्नान् पुनातु || 29 ||

इत्यादिनाथविरचित महाकालसंहितायां श्री गुह्यकाळी सुधाधारा स्तवः ||